तथैवेति सर्व्वत्रान्वयः ।*। शास्त्रान्तराद्विशेषो लिख्यते ।

"रतिकाले रतान्ते च पुनः सेव्यो रसोत्तमः ।
स्थावरं जङ्गमविषं जङ्गमं विषवारि वा ।
न विकाराय भवति साधकेन्द्रस्य वत्सरात् ॥
मृत्युञ्जयो यथाभ्यासात् मृत्युं जयति देहिनः ।
तथायं साधकेन्द्रस्य जरामरणनाशनः ॥"

शास्त्रान्तरे मकरध्वजो नाम । इति चन्द्रोदयः ।
इति रसेन्द्रचिन्तामणिः ॥

मकरन्दः,पुं,(मकरमपि अन्दति बध्नाति धारयतीति वा । अदि बन्धने + अच् ततः शकन्ध्वादित्वात् साधुः । ) पुष्परसः । इत्यमरः । २ । ४ । १७ ॥ ( यथा, रघौ । ४ । ८८ ॥

"प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥")

कुन्दपुष्पवृक्षः । किञ्जल्के क्ली । इति राजनिर्घण्टः ॥

मकरन्दवती, स्त्री, ( मकरन्दस्तत्तुषमहोऽस्या अस्तीति । मकरन्द + मतुप् । मस्य वः ङीप् । ) पाटलापुष्पम् । इति शब्दचन्द्रिका । मधुविशिष्टे त्रि ॥

मकरव्यूहः, पुं, ( मकरः मकराकारः व्यूहः । ) मकराकारसैन्यविन्यासः । इति महाभारतम् ॥

मकराकरः, पुं, ( मकराणामाकरः । षष्ठीतत्पुरुषः । ) समुद्रः । इति हेमचन्द्रः । १०७४ ॥ ( यथा, कथासरित्सागरे । ४३ । १३७ ।

"मकराकरमुल्लङ्घ्य प्राप तत्तीरवर्त्ति सः ॥")

मकराकारः, पुं, (मकरस्येवाकारो यस्य ।) वृक्षविशेषः । इति शब्दचन्द्रिका ॥ काँटाकरञ्ज । इति भाषा ॥ मकरमत्स्याकृतिश्च ॥

मकराङ्कः, पुं, ( मकरस्तदाकारोऽङ्कचिह्नं यस्य । ) कामदेवः । (मकरा अङ्केऽस्य ।) समुद्रः । इत्यजयपालः ॥

मकरालयः, पुं ( आलीयते अस्मिन्निति आलयः । मकराणामालयः ।) समुद्रः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १३ । ७६ । १२ ॥

"ततस्तं वारणं क्रुद्धं शरजालेन पाण्डवः ।
निवारयामास तदा वेलेव मकरालयम् ॥")

मकरी, [ न् ] पुं, समुद्रः । मकरोऽस्यास्तीति-व्युत्पत्त्या इनुप्रत्ययनिष्पन्नोऽयम् ॥

मकुटं, क्ली, ( मङ्कते अनेनेति । मकि भूषणे + बाहुलकात् उटः । आगमशास्त्रस्यानित्यत्वात् न नुम् ।) मुकुटम् । इति भरतधृतद्विरूपकोषः ॥

मकुतिः, स्त्री, ( मकि + उतिः । पृषोदरादित्वात् साधुः ।) शूद्रशासनम् । इति त्रिकाण्डशेषः ॥

मकुरः, पुं, ( मङ्कते इति । मकि + "मकुर दर्दुरौ ।" उणा० । १ । ४१ । इति उरच् । ) कुलालदण्डः । वकुलः । कोरकः । आदर्शः । इति हेमचन्द्रः । ३ । ३४८ ॥

मकुलः, पुं, क्ली, (मङ्कते भूषयति हृदयम् । मकि + बाहुलकादुलच् । ) वकुलः । मकुलः । इति शब्दरत्नावली ॥

मकुष्टकः, पुं, ( मकि भूषायां + उः । पृषोदरादित्वात् साधुर्मकुः । मकुं भूषां स्तकति प्रतिहन्तीति । स्तक + पचाद्यच् । ) वनजातमुद्गः । मोठ इति हिन्दी भाषा । मुगानि इति वङ्गभाषा । तत्पर्य्यायः । मयष्टः २ वनमुद्गः ३ कृमीलकः ४ अमृतः ५ अरण्यमुद्गः ६ वल्लीमुद्गः ७ । अस्य गुणाः । कषायत्वम् । मधुरत्वम् । रक्तपित्तज्वरदाहहरत्वम् । पथ्यत्वम् । रुचिकारित्वम् । सर्व्वदोषजयकारित्वञ्च । इति राजनिर्घण्टः ॥

"मकुष्टो वातलो ग्राही कफपित्तहरो लघुः ।
वह्निजिन्मधुरः पाके कृमिकृज्ज्वरनाशनः ॥"
इति भावप्रकाशः ॥

मकुष्ठः, पुं, ( मङ्कते मङ्क्यते इति वा । बाहुलकात् उः मकुः । तिष्ठतीति स्था + कः स्थः । मकुश्चासौ स्थश्चेति मकुष्ठः । पूर्व्वपदादिति । ८ । ३ । १०६ । षत्वम् । ) व्रीहिभेदः । मन्थरे त्रि । इति मेदिनी । ठे, १६ ।

"मकुष्ठो वनमुद्गः स्यान्मकुष्ठकमुकुष्ठकौ ।
( व्रीहिभेदार्थे यथा, पर्य्यायो गुणाश्च ।
मकुष्ठो वातलो ग्राही कफपित्तहरो लघुः ।
वह्निजिन्मधुरः पाके कृमिकृज्ज्वरनाशनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

मकुष्ठकः, पुं, ( मकुष्ठ + स्वार्थे कन् । ) वनमुद्गः । इति भरतः ॥ ( तथाच पर्य्यायाः ॥

मकुष्ठो वनमुद्गः स्यान्मकुष्ठकमुकुष्ठकौ ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

अस्य गुणा यथा, सुश्रुते सूत्रस्थाने ४६ अः ।

"मकुष्ठकाः कृमिकराः कलायाः प्रचुरानिलाः ॥")

मकूलकः, पुं, ( मकि मण्डने + पिच्छादित्वादूलच् बाहुलकाद्गुणङ्गलोपः । स्वार्थे कन् ।" इत्यमरटीकायां रघुनाथः ।) मुकूलकः । दन्तीवृक्षः । इत्यमरटीकायां रमानाथः ॥ ( पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"लघुदन्ती विशल्या च स्यादुदुम्बरपर्ण्यपि ।
तथैरण्डफला शीघ्रा श्येनघण्टा घुणप्रिया ।
वाराही चैव कथिता निकुम्भश्च मकूलकः ॥")

मक्क, ङ गतौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-सक०-सेट् । ) कोपधः । ङ मक्कते । इति दुर्गादासः ॥

मक्कल्लः,पुं,(मक्कं गमनं आत्यन्तिकगतिं मरणं लाति आदत्ते योजयतीत्यर्थः । ला + कः पृषोदरात् लकारागमे साधुः ।) शूलरोगविशेषः । यथा,

"सूतायां हृच्छिरोवस्तिशूलं मक्कल्लसंज्ञितम् ।
यवक्षारं पिबेत्तत्र मस्तुनोष्णोदकेन वा ॥"
इति चक्रपाणिदत्तः ॥

मक्कुलं, क्ली, ( मक्क + उलच् । ) शिलाजतु । इति शब्दरत्नावली ॥

( विवरणमस्य शिलाजतुशब्दे ज्ञातव्यम् ॥ )

मक्कोलः, पुं, खटिका । यथा,—

"मक्कोलो वर्णलेखा च कठिनी कक्खटी खटी ।
इति शेषवर्गे त्रिकाण्डशेषः ॥

मक्ष, रोषे । संघाते । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) मक्षति । इति दुर्गादासः ॥

मक्षः, पुं, ( मक्ष् + घञ् । ) स्वदोषाच्छादनम् । इति हारावली ॥ क्रोधः । समूहः । इति पूर्व्वोक्तधात्वर्थदर्शनात् ॥

मक्षवीर्य्यः, पुं, ( मक्षं निबिडं वीर्य्यमस्य । ) प्रियालवृक्षः । इति राजनिर्घण्टः ॥

मक्षिका, स्त्री, ( मशति शब्दायते इति । मश + "हनिमशिभ्यां सिकन् ।" उणा० । ४ । १५३ । इति सिकन् । ) कीटविशेषः । माछि इति भाषा ॥ ( यथा, भागवते । ५ । १४ । ४२ ।

"आर्षभस्येह राजर्षेर्मनसापि महात्मनः ।
नानुवर्त्मार्हति नृपो मक्षिकेव गरुत्मतः ॥" )

तत्पर्य्यायः । मक्षीका २ भम्भः ३ माक्षिका ४ गन्धलोलुपा ५ पतङ्गिका ६ पत्तिका ७ । इति शब्दरत्नावली ॥ अन्नतोत्पन्ना ८ वमनीया ९ पलङ्कषा १० । इति राजनिर्घण्टः ॥ नीला मक्षिका वर्वणा ११ । इत्यमरः । २ । ५ । २६ ॥ तन्नाशकधूपो यथा,—

"त्रिफलार्ज्जुनपुष्पाणि भल्लातकशिरीषकम् ।
लाक्षासर्ज्जरसश्चैव विडङ्गश्चैव गुग्गुलुः ।
एतैर्धूपैर्मक्षिकाणां मशकानां विनाशनम् ॥"
इति गारुडे १८१ अध्यायः ॥

मक्षिकामलं, क्ली, ( मक्षिकाया मधुमक्षिकाया मलम् । ) सिक्थकम् । इति राजनिर्घण्टः ॥ ( विशेषोऽस्य सिक्थशब्दे ज्ञेयः ॥ )

मक्षीका, स्त्री, ( मक्षिका । पृषोदरात् दीर्घः । ) मक्षिका । इति राजनिर्घण्टः ॥ ( रोगविशेषिकास्या अरिष्टत्वं यथा,—

"ललाटतुलिप्रगात्रेऽपि यस्मिन् मुञ्चन्ति
मक्षिकाः ।
स प्रमेहेण संसर्गं प्राप्यते नैव हन्यते ॥"
इति चरके इन्द्रियस्थाने पञ्चमेऽध्याये ॥ )

मख, सर्पणे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) मखति ॥

मखि, इ सर्पणे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् ।) इ मङ्खति इति दुर्गादासः ॥

मखः, पुं, ( मखन्ति गच्छन्ति देवा अत्रेति । मख सर्पणे + "हलश्च ।" ३।३।१२१ । इति घञ् । संज्ञापूर्व्वकत्वान्न वृद्धिः । यद्वा, पुंसीति घः ।) यज्ञः । इत्यमरः । २ । ७ । १३ ॥ यथा, देवीभागवते । १ । १६ । २३ ।

"कृत्वा तस्य मखं पूर्णं करिष्यामि तवापि वै ।"

मखत्राता, [ ऋ ] पुं, (त्रायते रक्षतीति कर्त्तरि तृच् । मखस्य त्राता । विश्वामित्रमखरक्षाकर्तृत्वात् । ) रामः । यथा,—

"राघवारिर्मखत्राता सीतायाः पतिरित्यपि ।"
इति शब्दरत्नावली ॥

मखवह्निः, पुं, ( मखस्य वह्निः मखाराध्यो वह्निरिति यावत् । ) यज्ञाग्निः । इति जटाधरः ॥